सामवेदस्य गोभिलीयगृह्यसूत्रम्

अथातो गृह्यकर्माण्युपदेक्ष्यामः १ यज्ञोपवीतिनाचान्तोदकेन कृत्यम् २ उदगयने पूर्वपक्षे पुण्येऽहनि प्रागावर्तनादह्नः कालं विद्यात् ३ यथादेशं च ४ सर्वाण्येवान्वाहार्यवन्ति ५ अपवर्गेऽभिरूपभोजनं यथाशक्ति ६ ब्रह्मचारी वेदमधीत्यान्त्यां समिधमभ्याधास्यन् ७ जायाया वा पाणिं जिघृक्षन् ८ अनुगुप्ता अप आहृत्य प्रागुदक्प्रवणं देशं समं वा परिसमुह्योपलिप्य मध्यतः प्राचीं लेखामुल्लिख्योदीचीं च संहतां पश्चाद्मध्ये प्राचीस्तिस्र उल्लिख्याभ्युक्षेत् ९ लक्षणावृदेषा सर्वत्र १० भूर्भुवःस्वरित्यभिमुखमग्निं प्रणयन्ति ११ प्रेते वा गृहपतौ परमेष्ठिकरणम् १२ तथा तिथिनक्षत्रपर्वसमवाये १३ दर्शे वा पौर्णमासे वाग्निसमाधानं कुर्वीत १४ वैश्यकुलाद्वाम्बरीषाद्वाग्निमाहृत्याभ्यादध्यात् १५ अपि वा बहुयाजिन एवागाराद्ब्राह्मणस्य वा राजन्यस्य वा वैश्यस्य वा १६ अपि वान्यं मथित्वाभ्यादध्यात् १७ पुण्यस्त्वेवानर्धुको भवतीति १८ यथा कामयेत तथा कुर्यात् १९ स यदेवान्त्यां समिधमभ्यादधाति जायाया वा पाणिं जिघृक्षन्जुहोति तमभिसंयच्छेत् २० स एवास्य गृह्योऽग्निर्भवति २१ तेन चैवास्य प्रातराहुतिर्हुता भवतीति २२ सायमाहुत्युपक्रम एवात ऊर्ध्वं गृह्येऽग्नौ होमो विधीयते २३ पुरा प्रादुष्करणवेलायाः सायंप्रातरनुगुप्ता अप आहरेत्परिचरणीयाः २४ अपि वा सायम् २५ अपि वा कुम्भाद्वा मणिकाद्वा गृह्णीयात् २६ पुरास्तमयादग्निं प्रादुष्कृत्यास्तमिते सायमाहुतिं जुहुयात् २७ पुरोदयात्प्रातः प्रादुष्कृत्योदितेनुदिते वा प्रातराहुतिं जुहुयात् २८ १

यज्ञोपवीतं कुरुते सूत्रं वस्त्रं वापि वा कुशरज्जुमेव १ दक्षिणं बाहुमुद्धृत्य शिरोऽवधाय सव्येऽँसे प्रतिष्ठापयति दक्षिणं कक्षमन्ववलम्बं भवत्येवं यज्ञोपवीती भवति २ सव्यं बाहुमुद्धृत्य शिरोऽवधाय दक्षिणेऽँसे प्रतिष्ठापयति सव्यं कक्षमन्ववलम्बं भवत्येवं प्राचीनावीती भवति ३ पितृयज्ञे त्वेव प्राचीनावीती भवति ४ उदङ्ङग्नेरुत्सृप्य प्रक्षाल्य पाणी पादौ चोपविश्य त्रिराचामेद्द्विः परिमृजीत ५ पादावभ्युक्ष्य शिरोऽभ्युक्षेत् ६ इन्द्रियाण्यद्भिः संस्पृशेत् ७ अक्षिणी नासिके कर्णाविति ८ यद्यन्मीमाँस्यं स्यात्तत्तदद्भिः संस्पृशेत् ९ तत्रैतदाहुः १० नोऽपस्पृशेद्व्रजन् ११ न तिष्ठन् १२ न हसन्

१३ न विलोकयन् १४ नाप्रणतः १५ नाङ्गुलीभिः १६ नातीर्थेन १७ न सशब्दम् १८ नानवेक्षितम् १९ न बाह्याँसः २० नान्तरीयैकदेशस्य कल्पयित्वोत्तरीयताम् २१ नोष्णाभिः २२ न सफेनाभिः २३ न च सोपानत्कः क्वचित् २४ कासक्तिकः २५ गले बद्धः २६ चरणौ न प्रसार्य च २७ अन्ततः प्रत्युपस्पृश्य शुचिर्भवति २८ हृदयस्पृशस्त्वेवाप आचामेत् २९ उच्छिष्टो हैवातोऽन्यथा भवतीति ३० अथ प्रत्युपस्पर्शनानि ३१ सुप्त्वा भुक्त्वा क्षुत्वा स्नात्वा पीत्वा विपरिधाय च रथ्यामाक्रम्य श्मशानं चाचान्तः पुनराचामेत् ३२ २

अग्निमुपसमाधाय परिसमूह्य दक्षिणजान्वक्तो दक्षिणेनाग्निमदितेऽनुमन्य-स्वेत्युदकाञ्जलिं प्रसिञ्चेत् १ अनुमतेऽनुमन्यस्वेति पश्चात् २ सरस्वत्य-नुमन्यस्वेत्युत्तरतः ३ देव सवितः प्रसुवेति प्रदक्षिणमग्निं पर्युक्षेत्सकृद्वा त्रिर्वा ४ पर्युक्षणान्तान्व्यतिहरन्नभिपर्युक्षन्होमीयम् ५ अथ हविष्यस्यान्न-स्याग्नौ जुहुयात्कृतस्य वाकृतस्य वा ६ अकृतं चेत्प्रक्षाल्य जुहुयात्प्रोदकं कृत्वा ७ अथ यदि दधि पयो यवागूं वा कँसेन वा चरुस्थाल्या वा स्रुवेण वैव ८ अग्नये स्वाहेति पूर्वां तूष्णीमुत्तरां मध्ये चापराजितायां च दिशीति सायम् ९ अथ प्रातः सूर्याय स्वाहेति पूर्वां तूष्णीमेवोत्तरां मध्ये चैवापराजितायां चैव दिशि १० समिधमाधायानुपर्युक्ष्य तथैवोदकाञ्जलीन्प्रसिञ्चेदन्वमँस्था इति मन्त्रविशेषः ११ प्रदक्षिणमग्निं परिक्रम्यापां शेषं निनीय पूरयित्वा चमसं प्रतिष्ठाप्य यथार्थम् १२ एवमत ऊर्ध्वं गृह्येऽग्नौ जुहुयाद्वा हावयेद्वाजीविता-वभृथात् १३ अथाप्युदाहरन्ति १४ कामं गृह्येऽग्नौ पत्नी जुहुयात्सायंप्रातर्होमौ गृहाः पत्नी गृह्य एषोऽग्निर्भवतीति १५ निष्ठिते सायमाशप्रातराशे भूतमिति प्रवाचयेत् १६ ऋते भगया वाचा शुचिर्भूत्वा १७ प्रतिजपत्योमित्युच्चैस्तस्मै नमस्तन्माख्या इत्युपाँशु १८ ३

अथ वाग्यतो बलीन्हरेत् १ भाषेतान्नसंसिद्धिमतिथिभिः कामं सम्भाषेत २ अथ हविष्यस्यान्नस्योद्धृत्य हविष्यैर्व्यञ्जनैरुपसिच्याग्नौ जुहुयात्तूष्णीं पाणिनैव ३ प्राजापत्या पूर्वाहुतिर्भवति सौविष्टकृत्युत्तरा ४ अथ बलीन्हरेद्बाह्यतो वान्तर्वा सुभूमिं कृत्वा ५ सकृदपो निनीय चतुर्धा बलिं निदध्यात्सकृदन्ततः परिषिञ्चेत् ६ एकैकं वानुनिधानमुभयतः परिषिञ्चेत् ७ स यत्प्रथमं निदधाति

स पार्थिवो बलिर्भवत्यथ यद्द्वितीयं स वायव्यो यत्तृतीयं स वैश्वदेवो यच्चतुर्थं स प्राजापत्यः ८ अथापरान्बलीन्हरेदुदधानस्य मध्यमस्य द्वारस्याब्दैवतः प्रथमो बलिर्भवत्योषधिवनस्पतिभ्यो द्वितीय आकाशाय तृतीयः ९ अथापरं बलिं हरेच्छयनं वाधिवर्चं वा स कामाय वा बलिर्भवति मन्यवे वा १० अथ सस्तूपं स रक्षोजनेभ्यः ११ अथैतद्बलिशेषमद्भिरभ्यासिच्यावसलवि दक्षिणा निनयेत्तत्पितृभ्यो भवति १२ आसीन एवाग्नौ जुहुयात् १३ आसीनः पितृभ्यो दद्याद्यथोपपादमितरान् १४ स्वयं त्वेवैतान्यावद्वसेद्बलीन्हरेत् १५ अपि वान्यो ब्राह्मणः १६ दम्पती एव १७ इति गृहमेधिव्रतम् १८ स्त्री ह सायं प्रातः पुमानिति १९ सर्वस्य त्वेवान्नस्यैतान्बलीन्हरेत्पित्र्यस्य वा स्वस्त्ययनस्य वार्थार्थस्य वा २० यज्ञादेव निवर्तते २१ यद्येकस्मिन्काले व्रीहियवौ प्रक्रियेतान्यतरस्य कृत्वा कृतं मन्येत २२ यद्येकस्मिन्काले पुनः पुनरन्नं पच्येत सकृदेवैतद्बलितन्त्रं कुर्वीत २३ यद्येकस्मिन्कुले बहुधान्नं पच्येत गृहपतिमहानसादेवैतद्बलितन्त्रं कुर्वीत २४ यस्य त्वेषामग्रतः सिध्येन्नियुक्तमग्नौ कृत्वाग्रं ब्राह्मणाय दत्त्वा भुञ्जीत २५ यस्यो जघन्यं भुञ्जीतैवेति २६ अथाप्युदाहरन्ति २७ एतस्यैव बलिहरणस्यान्ते कामं प्रब्रुवीत भवति हैवास्य २८ स्वयं त्वेवाशस्यं बलिं हरेद्यवेभ्योऽध्या व्रीहिभ्यो व्रीहिभ्योऽध्यायवेभ्यः सत्वाशस्यो नाम बलिर्भवति २९ दीर्घायुर्हैव भवति ३० विश्राणिते फलीकरणानामाचामस्यापामिति बलिं हरेत्स रौद्रो भवति स रौद्रो भवति ३१
४

अथ दर्शपूर्णमासयोः १ सन्ध्यां पौर्णमासीमुपवसेत् २ उत्तरामित्येके ३ अथ यदहश्चन्द्रमा न दृश्येतताममावास्याम् ४ पक्षान्ता उपवस्तव्याः पक्षादयोऽभियष्टव्याः ५ आमावास्येन हविषा पूर्वपक्षमभियजते पौर्णमास्येनापरपक्षम् ६ यः परमो विकर्षः सूर्याचन्द्रमसोः सा पौर्णमासी यः परमः संकर्षः सामावास्या ७ यदहस्त्वेव चन्द्रमा न दृश्येत ताममावास्यां कुर्वीत ८ दृश्यमानेऽप्येकदा गताध्वा भवतीति ९ त्रयः पौर्णमासीकाला भवन्ति सन्ध्या वास्तमितोदिता वोच्चैर्वा १० अथ यदहः पूर्णो भवति ११ पृथगेवैतस्य ज्ञानस्याध्यायो भवत्यधीयीत वा तद्विद्भ्यो वा पर्वावगमयेत १२ अथ यदहरुपवसथो भवति तदहः पूर्वाह्ण एव प्रातराहुतिं हुत्वैतदग्नेः स्थण्डिलं गोमयेन समन्तं पर्युपलिम्पति १३ अथैध्मानुपकल्पयते खादिरान्वा पाला-

शान्वा १४ खादिरपालाशालाभे बिभीदकतिल्वकबाधकनीवनिम्बराजवृ-
क्षशाल्मल्यरलुदधित्थकोविदारश्लेष्मातकवर्जं सर्ववनस्पतीनामिध्मो य-
थार्थं स्यात् १५ विशाखानि प्रति लूनाः कुशा बर्हिः १६ उपमूललूनाः पि-
तृभ्यः १७ तेषामलाभे शूकतृणशरशीर्यबल्वजमुतवनलशुराठवर्जं सर्वतृणानि
१८ आज्यं स्थालीपाकीयान्व्रीहीन्वा यवान्वा चरुस्थालीं मेक्षणं स्रुवमनुगुप्ता
अप इति १९ यानि चानुकल्पमुदाहरिष्यामः २० न तदहः प्रसृज्येत २१
दूरादपि गृहानभ्येयात् २२ अन्यतस्तु धनं क्रीणीयान्न विक्रीणीत २३
अबहुवादी स्यात् २४ सत्यं विवदिषेत् २५ अथापराह्ण एवाप्लुत्यौपवसथिकं
दम्पती भुञ्जीयातां यदेनयोः काम्यं स्यात्सर्पिर्मिश्रं स्यात्कुशलेन २६ ५

मानतन्तव्यो होवाचाहुता वा एतस्य मानुष्याहुतिर्भवति य औपवसथिकं
नाश्नाति १ अनीश्वरो ह क्षोधुको भवत्यकाम्यो जनानां पापवसीयसी हास्य
प्रजा भवति २ य औपवसथिकं भुङ्क्त ईश्वरो ह भवत्यक्षोधुकः काम्यो जनानां
वसीयसी हा स्य प्रजा भवति ३ तस्माद्यत्कामयेतौपवसथिकं भुञ्जीयाताम्
४ अध एवैतां रात्रिं शयीयाताम् ५ तौ खलु जाग्रन्मिश्रावेवैतां रात्रिं विहरे-
यातामितिहासमिश्रेण वा केनचिद्वा ६ जुगुप्सेयातां त्वेवाव्रत्येभ्यः कर्मभ्यः
७ न प्रवसन्नुपवसेदित्याहुः ८ पत्न्या व्रतं भवतीति ९ यथा कामयेत तथा
कुर्यात् १० एवमेवाहिताग्नेरप्युपवसथो भवति ११ यच्चाम्नायो विदध्यात्
१२ अथ पूर्वाह्ण एव प्रातराहुतिं हुत्वाग्रेणाग्निं परिक्रम्य दक्षिणतोऽग्नेः
प्रागग्रान्दर्भानास्तीर्य १३ तेषां पुरस्तात्प्रत्यङ्मुखस्तिष्ठन्सव्यस्य पाणेरङ्गुष्ठे-
नोपकनिष्ठिकया चाङ्गुल्या ब्रह्मासनात्तृणमभिसंगृह्य दक्षिणापरमष्टमं देशं
निरस्यति निरस्तः परावसुरिति १४ अप उपस्पृश्याथ ब्रह्मासन उपविशत्या
वसोः सदने सीदामीति १५ अग्निमभिमुखो वाग्यतः प्राञ्जलिरास्त आ कर्मणः
पर्यवसानात् १६ भाषेत यज्ञसंसिद्धिम् १७ नायज्ञियां वाचं वदेत् १८
यद्ययज्ञियां वाचं वदेद्वैष्णवीमृचं यजुर्वा जपेत् १९ अपि वा नमो विष्णव
इत्येवं ब्रूयात् २० यद्यु वा उभयं चिकीर्षेद्धौत्रं चैव ब्रह्मत्वं चैवैतेनैव कल्पेन
छत्त्रं वोत्तरासङ्गं वोदकमराडलुं दर्भवटुं वा ब्रह्मासने निधाय तेनैव
प्रत्याव्रज्याथान्यच्चेष्टेत् २१ ६

अथोलूखलमुसले प्रक्षाल्य शूर्पं च पश्चादग्नेः प्रागग्रान्दर्भानास्तीर्योपसादयति

१ अथ हविर्निर्वपति व्रीहीन्वा यवान्वा कँसेन वा चरुस्थाल्या वा २ अमुष्मै त्वा जुष्टं निर्वपामीति देवतानामादेशं सकृद्द्विस्तूष्णीम् ३ अथ पश्चात्प्राङ्मुखोऽवहन्तुमुपक्रमते दक्षिणोत्तराभ्यां पाणिभ्याम् ४ त्रिःफलीकृताँस्तण्डुलान्स्त्रिर्देवेभ्यः प्रक्षालयेदित्याहुर्द्विर्मनुष्येभ्यः सकृत्पितृभ्य इति ५ पवित्रान्तर्हिताँस्तण्डुलानावपेत् ६ कुशलश्रृतमिव स्थालीपाकं श्रपयेत्प्रदक्षिणमुदायुवन् ७ शृतमभिघार्योदगुद्वास्य प्रत्यभिघारयेत् ८ अग्निमुपसमाधाय कुशैः समन्तं परिस्तृणुयात्पुरस्ताद्दक्षिणत उत्तरतः पश्चादिति ९ सर्वतस्त्रिवृतं पञ्चवृतं वा १० बहुलमयुग्मसंहतम् ११ प्रागग्रैरग्रैर्मूलानि च्छादयन् १२ पश्चाद्वास्तीर्य दक्षिणतः प्राञ्चं प्रकर्षति तथोत्तरेण १३ दक्षिणोत्तराण्यग्राणि कुर्यात् १४ एष परिस्तरणन्यायः सर्वेष्वाहुतिमत्सु १५ परिधीनप्येके कुर्वन्ति शामीलान्पार्णान्वा १६ उत्तरतोऽपां पूर्नः स्रुवः प्रणीता १७ भवेन वा स्यादित्येके १८ बर्हिषि स्थालीपाकमासाद्येध्ममभ्याधायाज्यां संस्कुरुते १९ सर्पिस्तैलं दधि पयो यवागूं वा २० तत एव बर्हिषः प्रादेशमात्रे पवित्रे कुरुते २१ ओषधिमन्तर्धाय च्छिनत्ति न नखेन पवित्रे स्थो वैष्णव्याविति २२ अनेन अद्भिरनुमार्ष्टि विष्णोर्मनसा पूते स्थ इति २३ सम्पूयोत्पुनात्युदगग्राभ्यां पवित्राभ्याम् २४ अङ्गुष्ठाभ्यां चोपकनिष्ठिकाभ्यां चाङ्गुलिभ्यामभिसंगृह्य प्राक्शस्त्रिरुत्पुनाति देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिरिति सकृद्यजुषां द्विस्तूष्णीम् २५ अथैने अद्भिरभ्युक्ष्याग्नावप्युत्सृजेत् २६ अथैतदाज्यमधिश्रृत्योदगुद्वासयेत् २७ एवमाज्यस्य संस्करणकल्पो भवतीति २८ ७

पूर्वमाज्यमपरः स्थालीपाकः १ पर्युक्ष्य स्थालीपाक आज्यमानीय मेक्षणेनोपघातं होतुमेवोपक्रमते २ यद्यु वा उपस्तीर्णाभिघारितं जुहुषेदाज्यभागावेव प्रथमौ जुहुयात् ३ चतुर्गृहीतमाज्यं गृहीत्वा पञ्चावत्तं तु भृगूणामग्नये स्वाहेत्युत्तरतः सोमाय स्वाहेति दक्षिणतः प्राक्शो जुहुयात् ४ अथ हविष उपस्तीर्यावद्यति ५ मध्यात्पूर्वार्धाच्चतुरवत्ती चेद्भवति मध्यात्पूर्वार्धात्पश्चार्धादिति पञ्चावत्ती चेद्भवति ६ अभिघारयत्यवदानानि ७ प्रत्यनक्त्यवदानस्थानान्ययातयामतायै ८ अग्नये स्वाहेति मध्ये जुहुयात् ९ सकृद्वा त्रिर्वैतेनैव कल्पेन १० अथ स्विष्टकृत उपस्तीर्यावद्यत्युत्तरार्धपूर्वार्धात्सकृदेव भूयिष्ठं द्विरभिघारयेत् ११ यद्यु पञ्चावत्ती स्यादिद्वरुपस्तीर्यावदाय द्विरभि-

घारयेत् १२ न प्रत्यनक्त्यवदानस्थानं यातयामतायै १३ अग्नये स्विष्टकृते स्वाहेत्युत्तरार्धपूर्वार्धे जुहुयात् १४ महाव्याहृतिभिराज्येनाभिजुहुयात् १५ प्राक् स्विष्टकृत आवापः १६ गणेष्वेकं परिसमूहनमिध्मो बर्हिः पर्युक्षण-माज्यमाज्यभागौ च १७ सर्वेभ्यः समवदाय सकृदेव सौविष्टकृतं जुहोति १८ हुत्वैतन्मेक्षणमनुप्रहरेत् १९ प्रक्षाल्य वैतेनोद्धृत्य भुञ्जीत २० न स्रुवम-नुप्रहरेदित्येक आहुः २१ आग्नेय एवानाहिताग्नेरुभयोर्दर्शपूर्णमासयोः स्थाली-पाकः स्यात् २२ आग्नेयो वाग्नीषोमीयो वाहिताग्नेः पौर्णमास्याम् २३ ऐन्द्रो वैन्द्राग्नो वा माहेन्द्रो वामावास्यायाम् २४ अपि वाहिताग्नेरप्युभयोर्दर्श-पूर्णमासयोराग्नेय एव स्यात् २५ समिधमाधायानुपर्युक्ष्य यज्ञवास्तु करोति २६ तत एव बर्हिषः कुशमुष्टिमादायाज्ये वा हविषि वा त्रिरवदध्यादग्राणि मध्यानि मूलानीत्यक्तं रिहाणा व्यन्तु वय इति २७ अथैनमद्भिरभ्युक्ष्या-ग्नावप्यर्जयेद्यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा पशूनस्माकं मा हिँसीरे-तदस्तु हुतं तव स्वाहेति २८ एतद्यज्ञवास्त्वित्याचक्षते २९ ८

अथैतद्धविरुच्छिष्टमुदगुद्वास्योद्धृत्य ब्रह्मणे प्रयच्छेत् १ तं तितर्पयिषेत् २ ब्राह्मणस्य तृप्तिमनु तृप्यामीति ह यज्ञस्य वेदयन्ते ३ अथ यदस्यान्यद-न्नमुपसिद्धं स्यात् ४ अथ ब्राह्मणान्भक्तेनोपेप्सेत् ५ पूर्णपात्रो दक्षिणा तं ब्रह्मणे दद्यात् ६ कँसं चमसं वान्नस्य पूरयित्वा कृतस्य वाकृतस्य वापि वा फलानामेवैतं पूर्णपात्रमित्याचक्षते ७ ब्रह्मैवैक ऋृत्विक् ८ पाकयज्ञेषु स्वयं होता भवति ९ पूर्णपात्रोऽवमः पाकयज्ञानां दक्षिणा १० अपरिमितं पराध्यर्म् ११ अपि ह सुदाः पैजवन ऐन्द्राग्नेन स्थालीपाकेनेष्ट्वा शतं सहस्राणि ददौ १२ अथ यदि गृह्येऽग्नौ सायंप्रातर्होमयोर्वा दर्शपूर्णमासयोर्वा हव्यं वा होतारं वा नाधिगच्छेत्कथं कुर्यादिति १३ आ सायमाहुतेः प्रातराहुतिर्नात्येत्या प्रात-राहुतेः सायमाहुतिरामावास्यायाः पौर्णमासं नात्येत्या पौर्णमास्या आमावा-स्याम् १४ एतेनैवावकाशेन हव्यं वा होतारं वा लिप्सेत १५ अपि वा यज्ञियानामेवौषधिवनस्पतीनां फलानि वा पलाशानि वा श्रपयित्वा जुहुयात् १६ अप्यप एवान्ततो जुहुयादिति ह स्माह पाकयज्ञ ऐडो हुतं ह्येव १७ अहुतस्य प्रायश्चित्तं भवतीति १८ नाव्रतो ब्राह्मणः स्यादिति १९ अथाप्युदाहरन्ति २० यावन्न हूयेताभोजनेनैव तावत्संतनुयात् २१ अथ यदाधिगच्छेत्प्रतिजुहुयात् २२ एवमप्यस्य व्रतं संततं भवतीति २३ एषोऽत ऊर्ध्वं हविराहुतिषु न्यायः

२४ मन्त्रान्ते स्वाहाकारः २५ आज्याहुतिष्वाज्यमेव संस्कृत्योपघातं जुहुयान्नाज्यभागौ न स्विष्टकृत् २६ आज्याहुतिष्वनादेशे पुरस्ताच्चोपरिष्टाच्च महाव्याहृतिभिर्होमः २७ यथा पाणिग्रहणे तथा चूडाकर्मण्युपनयने गोदाने २८ अपवृत्ते कर्मणि वामदेव्यगानं शान्त्यर्थं शान्त्यर्थम् २९ ९

इति प्रथमः प्रपाठकः

पुण्ये नक्षत्रे दारान्कुर्वीत १ लक्षणप्रशस्तान्कुशलेन २ तदलाभे पिण्डान् ३ वेद्याः सीताया ह्रदाद्गोष्ठाच्चतुष्पथादादेवनादादहनादिरिणात् ४ सर्वेभ्यः सम्भार्यं नवमम् ५ समान्कृतलक्षणान् ६ पाणावाधाय कुमार्या उपनामयेदृतमेव प्रथममृतं नात्येति कश्चन र्त इयं पृथिवी श्रिता सर्वमिदमसौ भूयादिति तस्या नाम गृहीत्वैषामेकं गृहाणेति ब्रूयात् ७ पूर्वेषां चतुर्णां गृह्णन्तीमुपयच्छेत् ८ सम्भार्यमपि त्वेके ९ क्लीतकैर्यवैर्माषैर्वाप्लुतां सुहृत्सुरोत्तमेन सशरीरां त्रिर्मूर्धन्यभिषिञ्चेत्काम वेद ते नाम मदो नामासीति समानयामुमिति पतिनाम गृह्णीयात्स्वाहाकारान्ताभिरुपस्थमुत्तराभ्यां प्लावयेत् १० ज्ञातिकर्मैतत् ११ पाणिग्रहणे पुरस्ताच्छालाया उपलिप्तेऽग्निरुपसमाहितो भवति १२ अथ जन्यानामेको ध्रुवाणामपां कलशं पूरयित्वा सहोदकुम्भः प्रावृतो वाग्यतोऽग्रेणाग्निं परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते १३ प्राजनेनान्यः १४ शमीपलाशमिश्राँश्च लाजाँश्चतुरञ्जलिमात्राञ् छूर्पेणोऽपसादयन्ति पश्चादग्नेः १५ दृषत्पुत्रं च १६ अथ यस्याः पाणिं ग्रहीष्यन्भवति सशिरस्का साप्लुता भवति १७ अहतेन वसनेन पतिः परिदध्याद्या अकृन्तन्नित्येतयर्चा परिधत्त धत्त वाससेति च १८ प्रावृतां यज्ञोपवीतिनीमभ्युदानयन्जपेत्सोमोऽददद्गन्धर्वायेति १९ पश्चादग्नेः संवेष्टितं कटमेवंजातीयं वान्यत्पदा प्रवर्तयन्तीं वाचयेत्प्र मे पतियानः पन्थाः कल्पतामिति २० स्वयं जपेदजपन्त्यां प्रास्या इति २१ बर्हिषोऽन्तं कटान्तं प्रापयेत् २२ पूर्वे कटान्ते दक्षिणतः पाणिग्राहस्योपविशति २३ दक्षिणेन पाणिना दक्षिणमँसमन्वारब्धायाः षडाज्याहुतीर्जुहोत्यग्निरेतु प्रथम इत्येतत्प्रभृतिभिः २४ महाव्याहृतिभिश्च पृथक् २५ समस्ताभिश्चतुर्थीम् २६ १

हुत्वोपोत्तिष्ठतः १ अनुपृष्ठं पतिः परिक्रम्य दक्षिणत उदङ्मुखोऽवतिष्ठते वध्वञ्जलिं गृहीत्वा २ पूर्वा माता लाजानादाय भ्राता वा वधूमाक्रामयेदश्मानं

दक्षिणेन प्रपदेन ३ पाणिग्राहो जपतीममश्मानमारोहेति ४ सकृत्संगृहीतं लाजानामञ्जलिं भ्राता वध्वञ्जलावावपति ५ तं सोऽपस्तीर्णाभिघारितमग्नौ जुहोत्यविच्छिन्दत्यञ्जलिमियं नार्युपब्रूत इति ६ अर्यमणं नु देवं पूषणमित्युत्तरयोः ७ हुते पतिर्यथेतं परिव्रज्य प्रदक्षिणमग्निं परिणयति मन्त्रवान्वा ब्राह्मणः कन्यला पितृभ्य इति ८ परिणीता तथैवावतिष्ठते तथाक्रामति तथा जपति तथावपति तथा जुहोति ९ एवं त्रिः १० शूर्पेण शेषमग्नावोप्य प्रागुदीचीमभ्युत्क्रामयन्त्येकमिष इति ११ दक्षिणेन प्रक्रम्य सव्येनानुक्रामेत् १२ मा सव्येन दक्षिणमतिक्रामेति ब्रूयात् १३ ईक्षकान्प्रतिमन्त्रयेत सुमङ्गलीरियं वधूरिति १४ अपरेणाग्निमौदकोऽनुसंव्रज्य पाणिग्राहं मूर्धदेशेऽवसिञ्चति तथेतरां समञ्जन्त्वित्येतयर्चा १५ अवसिक्तायाः सव्येन पाणिनाञ्जलिमुपोद्गृह्य दक्षिणेन पाणिना दक्षिणं पाणिं साङ्गुष्ठमुत्तानं गृहीत्वैताः षट् पाणिग्रहणीया जपति गृभ्णामि त इति १६ समाप्तासूद्वहन्ति १७ २

प्रागुदीच्यां दिशि यद्ब्राह्मणकुलमभिरूपम् १ तत्राग्निरुपसमाहितो भवति २ अपरेणाग्निमानडुहं रोहितं चर्म प्राग्ग्रीवमुत्तरलोमास्तीर्णं भवति ३ तस्मिन्नेनां वाग्यतामुपवेशयन्ति ४ सा खल्वास्त एवानक्षत्रदर्शनात् ५ प्रोक्ते नक्षत्रे षडाज्याहुतीर्जुहोति लेखासन्धिष्वित्येतत्प्रभृतिभिः ६ आहुतेराहुतेस्तु सम्पातं मूर्धनि वध्वा अवनयेत् ७ हुत्वोपोत्थायोपनिष्क्रम्य ध्रुवं दर्शयति ८ ध्रुवमसि ध्रुवाहं पतिकुले भूयासममुष्यासाविति पतिनाम गृह्णीयादात्मनश्च ९ अरुन्धतीं च १० रुद्धाहमस्मीत्येवमेव ११ अथैनामनुमन्त्रयते ध्रुवा द्यौरित्येतयर्चा १२ अनुमन्त्रिता गुरुं गोत्रेणाभिवादयते १३ सोऽस्या वाग्विसर्गः १४ तावुभौ तत्प्रभृति त्रिरात्रमक्षारलवणाशिनौ ब्रह्मचारिणौ भूमौ सह शयीयाताम् १५ अत्रार्घ्यमित्याहुः १६ आगतेष्वित्येके १७ हविष्यमन्नं प्रथमं परिजपितं भुञ्जीत १८ श्वो भूते वा समशनीयं स्थालीपाकं कुर्वीत १९ तस्य देवता अग्निः प्रजापतिर्विश्वे देवा अनुमतिरिति २० उद्धृत्य स्थालीपाकं व्यूह्यैकदेशं पाणिनाभिमृशेदन्नपाशेन मणिनेति २१ भुक्त्वोच्छिष्टं वध्वै प्रदाय यथार्थम् २२ गौर्दक्षिणा २३ ३

यानमारोहन्त्यां सुकिंशुकं शाल्मलिमित्येतामृचं जपेत् १ अध्वनि चतुष्पथान्प्रतिमन्त्रयेत नदीश्च विषमाणि च महावृक्षाञ्श्मशानं च मा विदन्परिपन्थिन

इति २ अक्षभङ्गे नद्धविमोक्षे यानविपर्यासेऽन्यासु चापत्सु यमेवाग्निं हरन्ति तमेवोपसमाधाय व्याहृतिभिर्हुत्वान्यद्द्रव्यमाहृत्य य ऋते चिदभिश्रिष इत्याज्यशेषेणाभ्यञ्जेत् ३ वामदेव्यं गीत्वारोहेत् ४ प्राप्तेषु वामदेव्यम् ५ गृहगतां पतिपुत्रशीलसम्पन्ना ब्राह्मण्योऽवरोप्यानडुहे चर्मण्युपवेशयन्तीह गावः प्रजायध्वमिति ६ तस्याः कुमारमुपस्थ आदध्युः ७ तस्मै शकलोटानञ्जलावावपेयुः ८ फलानि वा ९ उत्थाप्य कुमारं ध्रुवा आज्याहुतीर्जुहोत्यष्टाविह धृतिरिति १० समाप्तासु समिधमाधाय यथावयसं गुरून्गोत्रेणाभिवद्य यथार्थम् ११ ४

अथातश्चतुर्थीकर्म १ अग्निमुपसमाधाय प्रायश्चित्ताज्याहुतीर्जुहोत्यग्ने प्रायश्चित्त इति चतुः २ अग्नेः स्थाने वायुचन्द्रसूर्याः ३ समस्य पञ्चमीं बहुवदूह्य ४ आहुतेराहुतेस्तु सम्पातमुदपात्रेऽवनयेत् ५ तेनैनां सकेशनखामभ्यज्य ह्रासयित्वाप्लावयन्ति ६ ऊर्ध्वं त्रिरात्रात्सम्भव इत्येके ७ यदर्तुमती भवत्युपरतशोणिता तदा सम्भवकालः ८ दक्षिणेन पाणिनोपस्थमभिमृशेद्विष्णुर्योनिं कल्पयत्वित्येतयर्चा गर्भं धेहि सिनीवालीति च ९ समाप्यर्चौ सम्भवतः १० ५

तृतीयस्य गर्भमासस्यादिसदेशे पुँसवनस्य कालः १ प्रातः सशिरस्काप्लुतोदगग्रेषु दर्भेषु पश्चादग्नेरुदगग्रेषु दर्भेषु प्राच्युपविशति २ पश्चात्पतिरवस्थाय दक्षिणेन पाणिना दक्षिणमँसमन्ववमृश्यानन्तर्हितं नाभिदेशमभिमृशेत्पुमाँसौ मित्रावरुणावित्येतयर्चा ३ अथ यथार्थम् ४ अथापरम् ५ प्रागुदीच्यां दिशि न्यग्रोधशुङ्गामुभयतःफलामस्रामामकृमिपरिसृप्तां त्रिःसप्तैर्यवैर्माषैर्वा परिक्रीयोत्थापयेत् ६ यद्यसि सौमी सोमाय त्वा राज्ञे परिक्रीणामि यद्यसि वारुणी वरुणाय त्वा राज्ञे परिक्रीणामि यद्यसि वसुभ्यो वसुभ्यस्त्वा परिक्रीणामि यद्यसि रुद्रेभ्यो रुद्रेभ्यस्त्वा परिक्रीणामि यद्यस्यादित्येभ्य आदित्येभ्यस्त्वा परिक्रीणामि यद्यसि मरुद्भ्यो मरुद्भ्यस्त्वा परिक्रीणामि यद्यसि विश्वेभ्यो देवेभ्यो विश्वेभ्यस्त्वा देवेभ्यः परिक्रीणामि ७ ओषधयः सुमनसो भूत्वास्यां वीर्यं समाधत्तेयं कर्म करिष्यतीत्युत्थाप्य तृणैः परिधायाहृत्य वैहायसीं निदध्यात् ८ दृषदं प्रक्षाल्य ब्रह्मचारी व्रतवती वा ब्रह्मबन्धूः कुमारी वाप्रत्याहरन्ती पिनष्टि ९ प्रातः सशिरस्काप्लुतोदगग्रेषु दर्भेषु पश्चादग्नेरुदगग्रेषु दर्भेषु

प्राक्शिराः संविशति १० पश्चात्पतिरवस्थाय दक्षिणस्य पाणेरङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्याभिसंगृह्य दक्षिणे नासिकास्रोतस्यवनयेत्पुमानग्निः पुमानिन्द्र इत्येतयर्चा ११ अथ यथार्थम् १२ ६

अथ सीमन्तकरणं प्रथमगर्भे १ चतुर्थे मासि षष्ठेऽष्टमे वा २ प्रातः सशिरस्काप्लुतोदगग्रेषु दर्भेषु पश्चादग्नेरुदगग्रेषु दर्भेषु प्राच्युपविशति ३ पश्चात्पतिरवस्थाय युग्मन्तमौदुम्बरं शलाटुग्रथ्नमाबध्नात्ययमूर्जावतो वृक्ष इति ४ अथ सीमन्तमूर्ध्वमुन्नयति भूरिति दर्भपिञ्जूलीभिरेव प्रथमं भुवरिति द्वितीयं स्वरिति तृतीयम् ५ अथ वीरतरेण येनादितेरित्येतयर्चा ६ अथ पूर्णचात्रेण राकामहमित्येतयर्चा ७ त्रिःश्वेतया च शलल्या यास्ते राके सुमतय इति ८ कृसरः स्थालीपाक उत्तरघृतस्तमवेक्षयेत् ९ किं पश्यसीत्युक्त्वा प्रजामिति वाचयेत् १० तं सा स्वयं भुञ्जीत ११ वीरसूर्जीवसूर्जीवपत्नीति ब्राह्मण्यो मङ्गल्याभिर्वाग्भिरुपासीरन् १२ अथ सोष्यन्तीहोमः १३ प्रतिष्ठिते वस्तौ परिस्तीर्याग्निमाज्याहुती जुहोति या तिरश्चीत्येतयर्चा विपश्चित्पुच्छमभरदिति च १४ पुमानयं जनिष्यतेऽसौ नामेति नामधेयं गृह्णाति १५ यत्तद्गुह्यमेव भवति १६ यदास्मै कुमारं जातमाचक्षीरन्नथ ब्रूयात्काङ्क्षत नाभिकृन्तनेन स्तनप्रतिधानेन चेति १७ व्रीहियवौ पेषयेत्तयैवावृता यया शुङ्गाम् १८ दक्षिणस्य पाणेरङ्गुष्ठेनोपकनिष्ठिकया चाङ्गुल्याभिसंगृह्य कुमारस्य जिह्वायां निमार्ष्टीयमाज्ञेति १९ तथैव मेधाजननं सर्पिः प्राशयेत् २० जातरूपेण वादाय कुमारस्य मुखे जुहोति मेधां ते मित्रावरुणावित्येतयर्चा सदसस्पतिमद्भुतमिति च २१ कृन्तत नाभिमिति ब्रूयात्स्तनं च प्रतिधत्तेति अत ऊर्ध्वमसमालम्भनमा दशरात्रात् २२ ७

जननाद्यस्तृतीयो ज्यौत्स्नस्तस्य तृतीयायां प्रातः सशिरस्कं कुमारमाप्लाव्यास्तमिते वीते लोहितिम्नयञ्जलिकृतः पितोपतिष्ठते १ अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत उदञ्चं पित्रे प्रयच्छत्युदक्शिरसम् २ अनुपृष्ठं परिक्रम्योत्तरतोऽवतिष्ठते ३ अथ जपति यत्ते सुसीम इति यथायं न प्रमीयेत पुत्रो जनित्र्या अधीति ४ उदञ्चं मात्रे प्रदाय यथार्थम् ५ अथ येऽत ऊर्ध्वं ज्यौत्स्नाः प्रथमोद्दिष्ट एव तेषु पितोपतिष्ठतेऽपामञ्जलिं पूरयित्वाभिमुखश्चन्द्रमसम् ६ यददश्चन्द्रमसीति सकृद्यजुषा द्विस्तूष्णीमुत्सृज्य यथार्थम् ७

जननाद्दशरात्रे व्युष्टे शतरात्रे संवत्सरे वा नामधेयकरणम् ८ अथ यस्तत्करिष्यन्भवति पश्चादग्नेरुदगग्रेषु दर्भेषु प्राङुपविशति ९ अथ माता शुचिना वसनेन कुमारमाच्छाद्य दक्षिणत उदञ्चं कर्त्रे प्रयच्छत्युदक्शिरसम् १० अनुपृष्ठम्परिक्रम्योत्तरत उपविशत्युदगग्रेष्वेव दर्भेषु ११ अथ जुहोति प्रजापतये तिथये नक्षत्राय देवताया इति १२ तस्य मुख्यान्प्राणान्संमृशन्कोऽसि कतमोऽसीत्येतं मन्त्रं जपति १३ आहस्पत्यं मासं प्रविशासावित्यन्ते च मन्त्रस्य घोषवदाद्यन्तरन्तस्थं दीर्घाभिनिष्ठानान्तं कृतं नाम दध्यात् १४ एतदतद्धितम् १५ अयुग्दान्तं स्त्रीणाम् १६ मात्रे चैव प्रथमं नामधेयमाख्याय यथार्थम् १७ गौर्दक्षिणा १८ कुमारस्य मासि मासि संवत्सरे सांवत्सरिकेषु वा पर्वस्वग्नीन्द्रौ द्यावापृथिवी विश्वान्देवाँश्च यजेत १९ दैवतमिष्ट्वा तिथिं नक्षत्रं च यजेत २० विप्रोष्य ज्येष्ठस्य पुत्रस्योभाभ्यां पाणिभ्यां मूर्धानं परिगृह्य जपेद्यदा वा पिता म इति विद्यादुपेतस्य वाङ्गादङ्गात्सस्रवसीति २१ पशूनां त्वा हिङ्कारेणाभिजिघ्रामीत्यभिजिघ्रेच्च यथार्थम् २२ एवमेवावरेषाम् २३ यथाज्येष्ठं यथोपलम्भं वा २४ स्त्रियास्तूष्णीं मूर्धन्यभिजिघ्रणं मूर्धन्यभिजिघ्रणम् २५
८

अथातस्तृतीये वर्षे चूडाकरणम् १ पुरस्ताच्छालाया उपलिप्तेऽग्निरुपसमाहितो भवति २ तत्रैतान्युपक्लृप्तानि भवन्ति ३ एकविँशतिर्दर्भपिञ्जूल्य उष्णोदककँस औदुम्बरः क्षुर आदर्शो वा क्षुरपाणिर्नापित इति दक्षिणतः ४ आनडुहो गोमयः कृसरः स्थालीपाको वृथापक्व इत्युत्तरतः ५ व्रीहियवैस्तिलमाषैरिति पृथक् पात्राणि पूरयित्वा पुरस्तादुपनिदध्युः ६ कृसरो नापिताय सर्वबीजानि चेति ७ अथ माता शुचिना वसनेन कुमारमाच्छाद्य पश्चादग्नेरुदगग्रेषु दर्भेषु प्राच्युपविशति ८ अथ यस्तत्करिष्यन्भवति पश्चात्प्राङवतिष्ठते ९ अथ जपत्यायमगात्सविता क्षुरेणेति सवितारं मनसा ध्यायन्नापितं प्रेक्षमाणः १० उष्णेन वाय उदकेनैधीति वायुं मनसा ध्यायन्नुष्णोदककँसं प्रेक्षमाणः ११ दक्षिणेन पाणिनाप आदाय दक्षिणां कपुष्णिकामुन्दत्याप उन्दन्तु जीवस इति १२ विष्णोर्दँष्ट्रोऽसीत्यौदुम्बरं क्षुरं प्रेक्षत आदर्शं वा १३ ओषधे त्रायस्वैनमिति सप्त दर्भपिञ्जूलीर्दक्षिणायां कपुष्णिकायामभिशिरोग्रा निदधाति १४ ता वामेन पाणिना निगृह्य दक्षिणेन पाणिनौदुम्बरं क्षुरं गृहीत्वादर्शं वाभिनिदधाति स्वधिते मैनं हिँसीरिति १५ येन पूषा बृहस्पतेरिति त्रिः प्राञ्चं प्रोहत्य-

प्रच्छिन्दन्सकृद्यजुषा द्विस्तूष्णीम् १६ अथायसेन प्रच्छिद्यानडुहे गोमये निदधाति १७ एतयैवावृता कपुच्छलम् १८ एतयोत्तरां कपुष्णिकाम् १९ उन्दनप्रभृति त्वेवाभिनिवर्तयेत् २० उभाभ्यां पाणिभ्यां मूर्धानं परिगृह्य जपेत्त्र्यायुषं जमदग्नेरिति २१ एतयैवावृता स्त्रियाः २२ तूष्णीम् २३ मन्त्रेण तु होमः २४ उदङङ्ग्नेरुत्सृप्य कुशलीकारयन्ति यथागोत्रकुलकल्पम् २५ आनडुहे गोमये केशान्कृत्वारण्यं हृत्वा निखनन्ति २६ स्तम्बे हैके निदधति २७ यथार्थम् २८ गौर्दक्षिणा २९ ९

गर्भाष्टमेषु ब्राह्मणमुपनयेत् १ गर्भैकादशेषु क्षत्रियं २ गर्भद्वादशेषु वैश्यम् ३ आ षोडशाद्वर्षाद्ब्राह्मणस्यानतीतः कालो भवत्या द्वाविँशात्क्षत्रियस्याचतुर्विँशाद्वैश्यस्य ४ अत ऊर्ध्वं पतितसावित्रीका भवन्ति ५ नैनानुपनयेयुर्नाध्यापयेयुर्न याजयेयुर्नैभिर्विवहेयुः ६ यदहरुपैष्यन्माणवको भवति प्रग एवैनं तदहर्भोजयन्ति कुशलीकारयन्त्याप्लावयन्त्यलङ्कुर्वन्त्यहतेन वाससाच्छादयन्ति ७ क्षौमशाणकार्पासौर्णान्येषां वसनानि ८ ऐणेयरौरवाजान्यजिनानि मुञ्जकाशताम्बल्यो रशनाः ९ पार्णबैल्वाश्वत्था दण्डाः ११ क्षौमं शाणं वा वसनं ब्राह्मणस्य कार्पासं क्षत्रियस्याविकं वैश्यस्य १२ एतेनैवेतराणि द्रव्याणि व्याख्यातानि १३ अलाभे वा सर्वाणि सर्वेषाम् १४ पुरस्ताच्छालाया उपलिप्तेऽग्निरुपसमाहितो भवति १५ अग्ने व्रतपत इति हुत्वा पश्चादग्नेरुदगग्रेषु दर्भेषु प्राङाचार्योऽवतिष्ठते १६ अन्तरेणाग्न्याचार्यौ माणवकोऽञ्जलिकृतोऽभिमुख आचार्यमुदगग्रेषु दर्भेषु १७ तस्य दक्षिणतोऽवस्थाय मन्त्रवान्ब्राह्मणोऽपामञ्जलिं पूरयति १८ उपरिष्टाच्चाचार्यस्य १९ प्रेक्षमाणो जपत्यागन्त्रा समगन्महीति २० ब्रह्मचर्यमागामिति वाचयति २१ को नामासीति नामधेयं पृच्छति तस्याचार्यः २२ अभिवादनीयं नामधेयं कल्पयित्वा २३ देवताश्रयं वा नक्षत्राश्रयं वा २४ गोत्राश्रयमप्येके २५ उत्सृज्यापामञ्जलिमाचार्यो दक्षिणेन पाणिना दक्षिणं पाणिं साङ्गुष्ठं गृह्णाति देवस्य ते सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णाम्यसाविति २६ अथैनं प्रदक्षिणमावर्तयति सूर्यस्यावृतमन्वावर्तस्वासाविति २७ दक्षिणेन पाणिना दक्षिणमँसमन्ववमृश्यानन्तर्हितां नाभिमभिमृशेत्प्राणानां ग्रन्थिरसीति २८ उत्सृप्य नाभिदेशमहुर इति २९ उत्सृप्य हृदयदेशं कृशन इति ३० दक्षिणेन पाणिना दक्षिणमँसमन्वालभ्य प्रजापतये त्वा परिददाम्यसाविति ३१ सव्येन

सव्यं देवाय त्वा सवित्रे परिददाम्यसाविति ३२ अथैनं संप्रेष्यति ब्रह्मचार्यस्यासाविति ३३ समिधमाधेह्यपोशान कर्म कुरु मा दिवा स्वाप्सीरिति ३४ उदङ्ङग्नेरुत्सृप्य प्राङाचार्य उपविशत्युदगग्रेषु दर्भेषु ३५ प्रत्यङ्माणवको दक्षिणजान्वक्तोऽभिमुख आचार्यमुदगग्रेष्वेव दर्भेषु ३६ अथैनं त्रिः प्रदक्षिणं मुञ्जमेखलां परिहरन्वाचयतीयं दुरुक्तात्परिबाधमानेत्यृतस्य गोप्त्रीति च ३७ अथोपसीदत्यधीहि भोः सावित्रीं मे भवाननुब्रवीत्विति ३८ तस्मा अन्वाह पच्छोऽर्धर्चश ऋक्श इति ३९ महाव्याहृतीश्च विहृता ओँकारान्ताः ४० वार्क्षं चास्मै दण्डं प्रयच्छन्वाचयति सुश्रवः सुश्रवसं मा कुर्विति ४१ अथ भैक्षं चरति ४२ मातरमेवाग्रे द्वे चान्ये सुहृदौ यावत्यो वा सन्निहिताः स्युः ४३ आचार्याय भैक्षं निवेदयते ४४ तिष्ठत्यहःशेषं वाग्यतः ४५ अस्तमिते समिधमादधात्यग्नये समिधमहार्षमिति ४६ त्रिरात्रमक्षारालवणाशी भवति ४७ तस्यान्ते सावित्रश्चरुः ४८ यथार्थम् ४९ गौर्दक्षिणा ५० १०

इति द्वितीयः प्रपाठकः

अथातः षोडशे वर्षे गोदानम् १ चूडाकरणेन केशान्तकरणं व्याख्यातम् २ ब्रह्मचारी केशान्तान्कारयते ३ सर्वाण्यङ्गलोमानि संहारयते ४ गोमिथुनं दक्षिणा ब्राह्मणस्य ५ अश्वमिथुनं क्षत्रियस्य ६ अविमिथुनं वैश्यस्य ७ गौर्वैव सर्वेषाम् ८ अजः केशप्रतिग्राहाय ९ उपनयनेनैवोपनयनं व्याख्यातम् १० न त्विहाहतं वासो नियुक्तम् ११ नालङ्कारः १२ नाचरिष्यन्तं संवत्सरमुपनयेत् १३ वार्क्षं चास्मै दण्डं प्रयच्छन्नादिशति १४ आचार्याधीनो भवान्यत्राधर्मचरणात् १५ क्रोधानृते वर्जय १६ मैथुनम् १७ उपरिशय्याम् १८ कौशीलवगन्धाञ्जनानि १९ स्नानम् २० अवलेखनदन्तप्रक्षालनपादप्रक्षालनानि २१ क्षुरकृत्यम् २२ मधुमाँसे २३ गोयुक्तारोहणम् २४ अन्तर्ग्राम उपानहोर्धारणम् २५ स्वयमिन्द्रियमोचनमिति २६ मेखलाधारणभैक्षचर्यदण्डधारणसमिदाधानोदकोपस्पर्शनप्रातरभिवादा इत्येते नित्यध-र्माः २७ गोदानिकव्रातिकादित्यव्रतौपनिषदज्यैष्ठसामिकाः संवत्सराः २८ तेषु सायंप्रातरुदकोपस्पर्शनम् २९ आदित्यव्रतं तु न चरन्त्येके ३० ये चरन्त्येकवाससो भवन्ति ३१ आदित्यं च नान्तर्दधतेऽन्यत्र वृक्षशरणाभ्याम् ३२ नापोऽभ्यवयन्त्यूर्ध्वं जानुभ्यामगुरुप्रयुक्ताः ३३ १

द्वादश महानाम्निकाः संवत्सराः १ नव षट् त्रयः २ इति विकल्पः ३ संवत्सरमप्येके ४ व्रतं तु भूयः ५ पूर्वैश्चेच्छ्रुता महानाम्न्यः ६ अथापि रौरुकिब्राह्मणं भवति ७ कुमारान्ह स्म वै मातरः पाययमाना आहुः ८ शक्वरीणां पुत्रका व्रतं पारयिष्णवो भवतेति ९ तास्वनुसवनमुदकोपस्पर्शनम् १० नानुपस्पृश्य भोजनं प्रातः ११ सायमुपस्पृश्याभोजनमा समिदाधानात् १२ कृष्णवस्त्रः १३ कृष्णभक्षः १४ आचार्याधीनः १५ अपन्थदायी १६ तपस्वी १७ तिष्ठेद्दिवा १८ आसीत नक्तम् १९ वर्षति च नोपसर्पेच्छन्नम् २० वर्षन्तं ब्रूयादापः शक्वर्य इति २१ विद्योतमानं ब्रूयादेवंरूपाः खलु शक्वर्यो भवन्तीति २२ स्तनयन्तं ब्रूयान्मह्या महान्घोष इति २३ न स्रवन्तीमतिक्रामेदनुपस्पृशन् २४ न नावमारोहेत् २५ प्राणसंशये तूपस्पृश्यारोहेत् २६ तथा प्रत्यवरुह्य २७ उदकसाधवो हि महानाम्न्य इति २८ एवं खलु चरतः कामवर्षी पर्जन्यो भवति २९ अनियमो वा कृष्णस्थानासनपन्थभक्षेषु ३० तृतीये चरिते स्तोत्रीयामनुगापयेत् ३१ एवमितरे स्तोत्रीये ३२ सर्वा वान्ते सर्वस्य ३३ उपोषिताय संमीलितायानुगापयेत् ३४ कँसमपां पूरयित्वा सर्वौषधीः कृत्वा हस्माववधाय प्रदक्षिणमाचार्योऽहतेन वसनेन परिणह्येत् ३५ परिणहनान्ते वानुगापयेत् ३६ परिणद्धो वाग्यतो न भुञ्जीत त्रिरात्रमहोरात्रौ वा ३७ अपि वारण्ये तिष्ठेदास्तमयात् ३८ श्वो भूतेऽरण्येऽग्निमुपसमाधाय व्याहृतिभिर्हुत्वाथैनमवेक्षयेत् ३९ अग्निमाज्यमादित्यं ब्रह्माणमनड्वाहमन्नमपो दधीति ४० स्वरभिव्यख्यं ज्योतिरभिव्यख्यमिति ४१ एवं त्रिः सर्वाणि ४२ शान्तिं कृत्वा गुरुमभिवादयते ४३ सोऽस्य वाग्विसर्गः ४४ अनड्वान्कँसो वासो वर इति दक्षिणाः ४५ प्रथमे विकल्पः ४६ आच्छादयेद्गुरुमित्येके ४७ ऐन्द्रः स्थालीपाकस्तस्य जुहुयादृचं साम यजामह इत्येतयर्चा सदसस्पतिमद्भुतमिति वोभाभ्यां वा ४८ अनुप्रवचनीयेष्वेवम् ४९ सर्वत्राचार्षं तदशकं तेनारात्समुपगामिति मन्त्रविशेषः ५० आग्नेयेऽज ऐन्द्रे मेषो गौः पावमाने पर्वदक्षिणाः ५१ प्रत्येत्याचार्यं सपरिषत्कं भोजयेत् ५२ सब्रह्मचारिणश्चोपसमेतान् ५३ ज्येष्ठसाम्नो महानाम्निकेनैवानुगापनकल्पो व्याख्यातः ५४ तत्रैतानि नित्यव्रतानि भवन्ति ५५ न शूद्रामुपेयात् ५६ न पक्षिमाँसं भुञ्जीत ५७ एकधान्यमेकदेशमेकवस्त्रं च वर्जयेत् ५८ उद्धताभिरद्भिरुपस्पृशेत् ५९ आदेशनात्प्रभृति न मृण्मयेऽश्नीयात् ६० न पिबेत् ६१ श्रवणादित्येके ६२ २

प्रौष्ठपदीं हस्तेनोऽपाकरणम् १ व्याहृतिभिर्हुत्वा शिष्याणां सावित्र्यनुवचनं यथोपनयने २ सामसावित्रीं च ३ सोमं राजानं वरुणमिति च ४ आदितश्छन्दसोऽधीत्य यथार्थम् ५ अक्षतधाना भक्षयन्ति धानावन्तं करम्भिणमिति ६ दध्नः प्राश्नन्ति दधिक्राव्णोऽकारिषमिति ७ आचान्तोदकाः खाण्डिकेभ्योऽनुवाक्या अनुगेयाः कारयेत् ८ सावित्रमहः काङ्क्षन्ते ९ उदगयने च पक्षिणीं रात्रिम् १० उभयत एके त्रिरात्रम् ११ आचार्याणां चोदकोत्सेचनमुभयत्र १२ श्रवणामेक उपाकृत्यैतमा सावित्रात्कालं काङ्क्षन्ते १३ तैषीमुत्सृजन्ति १४ प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य या आपोऽनवमेहनीयास्ता अभ्येत्योपस्पृश्य च्छन्दाँस्यृषीनाचार्यांश्च तर्पयेयुः १५ तस्मिन्प्रत्युपाकरणेऽध्यानध्याय आ पुनरुपाकरणाच्छन्दसः १६ विद्युत्स्तनयित्नुपृषितेष्वाकालम् १७ उल्कापातभूमिचलज्योतिषोरुपसर्गेषु १८ निर्घाते च १९ अष्टकामावास्यासु नाधीयीरन् २० पौर्णमासीषु २१ तिसृषु कार्त्तिक्यां फाल्गुन्यामाषाढ्यां च २२ अहोरात्रम् २३ सब्रह्मचारिणि च प्रेते २४ स्वे च भूमिपतौ २५ त्रिरात्रमाचार्ये २६ उपसन्ने त्वहोरात्रम् २७ गीतवादित्ररुदितातिवातेषु तत्कालम् २८ शिष्टाचारोऽतोऽन्यत्र २९ अद्भुते कुलपत्योः प्रायश्चित्तम् ३० वँशमध्यमयोर्मणिके वा भिन्ने व्याहृतिभिर्जुहुयात् ३१ दुःस्वप्नेष्वद्य नो देव सवितरित्येतामृचं जपेत् ३२ अथापरम् ३३ चित्ययूपोपस्पर्शनकर्णक्रोशाक्षिवेपनेषु सूर्याभ्युदितः सूर्याभिनिम्लुप्त इन्द्रियैश्च पापस्पर्शैः पुनर्मामैत्विन्द्रियमित्येताभ्यामाज्याहुती जुहुयात् ३४ आज्यलिप्ते वा समिधौ ३५ जपेद्वा लघुषु ३६ ३

ब्रह्मचारी वेदमधीत्य १ उपन्याहृत्य गुरवे २ अनुज्ञातो दारान्कुर्वीत ३ असगोत्रान् ४ मातुरसपिण्डा ५ अनग्निका तु श्रेष्ठा ६ अथाप्लवनम् ७ उत्तरतः पुरस्ताद्वाचार्यकुलस्य परिवृतं भवति ८ तत्र प्रागग्रेषु दर्भेषूदङ्ङाचार्य उपविशति ९ प्राग्ब्रह्मचार्युदगग्रेषु दर्भेषु १० सर्वौषधिविफाण्टाभिरद्भिर्गन्धवतीभिः शीतोष्णाभिराचार्योऽभिषिञ्चेत् ११ स्वयमिव तु १२ मन्त्रवर्णो भवति १३ ये अप्स्वन्तरग्नयः प्रविष्टा इत्यपामञ्जलिमवसिञ्चति १४ यदपां घोरं यदपां क्रूरं यदपामशान्तमिति च १५ यो रोचनस्तमिह गृह्णामीत्यात्मानमभिषिञ्चति १६ यशसे तेजस इति च १७ येन स्त्रियमकृणुतमिति च १८ तूष्णीं चतुर्थम् १९ उपोत्थायदित्यमुपतिष्ठेतोद्यन्भ्राजभृ-

ष्टिभिरित्येतत्प्रभृतिना मन्त्रेण २० यथालिङ्गं वा विहरन् २१ चक्षुरसी-त्यनुबध्नीयात् २२ मेखलामवमुञ्चत उदुत्तमं वरुणपाशमिति २३ ब्राह्मना-न्भोजयित्वा स्वयं भुक्त्वा केशश्मश्रुरोमनखानि वापयीत शिखावर्जम् २४ स्नात्वालङ्कृत्याहते वाससी परिधाय स्रजमाबध्नीत श्रीरसि मयि रमस्वेति २५ नेत्र्यौ स्थो नयतं मामित्युपानहौ २६ गन्धर्वोऽसीति वैणवं दण्डं गृह्णाति २७ आचार्यं सपरिषत्कमभ्येत्याचार्यपरिषदमीक्षते यक्षमिव चक्षुषः प्रियो वो भूयासमिति २८ उपोपविश्य मुख्यान्प्राणान्संमृशन्नोष्ठापिधाना नकुलीति २९ अत्रैनमाचार्योऽर्हयेत् ३० गोयुक्तं रथमुपसंक्रम्य पक्षसी कूबरबाहू वाभि-मृशेद्वनस्पते वीड्वङ्गो हि भूया इति ३१ आस्थाता ते जयतु जेत्वानीत्यातिष्ठति ३२ प्राङ्वोदङ्वाभिप्रयाय प्रदक्षिणमावृत्योपयाति ३३ उपयाताया-र्घ्यमिति कौहलीयाः ३४ ४

अत ऊर्ध्वं वृद्धशीली स्यादिति समस्तोद्देशः १ तत्रैतान्याचार्याः परिसंचक्षते २ नाजातलोम्न्योपहासमिच्छेत् ३ नायुग्वा ४ न रजस्वलया ५ न समानर्ष्या ६ नापरया द्वारा प्रपन्नमन्नं भुञ्जीत ७ न द्विःपक्वम् ८ न पर्युषितम् ९ अन्यत्र शाकमाँसयवपिष्टविकारेभ्यः १० न वर्षति धावेत् ११ नोपानहौ स्वयं हरेत् १२ नोदपानमवेक्षेत् १३ न फलानि स्वयं प्रचिन्वीत १४ नागन्धां स्रजं धारयेत् १५ अन्यां हिरण्यस्रजः १६ न मालोक्ताम् १७ स्रगिति वाचयेत् १८ भद्रमित्येतां वृथावाचं परिहरेत् १९ भद्रमिति ब्रूयात् २० तत्रैते त्रयः स्नातका भवन्ति २१ विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति २२ तेषामुत्तमः श्रेष्ठस्तुल्यौ पूर्वौ २३ नार्द्रं परिदधीत २४ नैकं परिदधीत २५ न मनुष्यस्य स्तुतिं प्रयुञ्जीत २६ नादृष्टं दृष्टतो ब्रुवीत २७ नाश्रुतं श्रुततः २८ स्वाध्यायविरोधिनोऽर्थानुत्सृजेत् २९ तैलपात्रमिवात्मानं दिधारयिषेत् ३० न वृक्षमारोहेत् ३१ न प्रतिसायं ग्रामान्तरं व्रजेत् ३२ नैकः ३३ न वृषलैः सह ३४ न कासृत्या ग्रामं प्रविशेत् ३५ न चाननुचरश्चरेत् ३६ एतानि समावृत्तव्रतानि ३७ यानि च शिष्टा विदध्युः ३८ ५

गाः प्रकाल्यमाना अनुमन्त्रयेतेमा मे विश्वतो वीर्य इति १ प्रत्यागता इमा मधुमतीर्मह्यमिति २ पुष्टिकामः प्रथमजातस्य वत्सस्य प्राङ्मातुः प्रलेहना-ज्जिह्वया ललाटमुल्लिह्य निगिरेद्गवां श्लेष्मासीति ३ पुष्टिकाम एव संप्रजा-

तासु निशायां गोष्ठेऽग्निमुपसमाधाय विलयनं जुहुयात्संग्रहण संगृहाणेति ४ पुष्टिकाम एव संप्रजातास्वौदुम्बरेणासिना वत्समिथुनयोर्लक्षणं करोति पुँस एवाग्रेऽथ स्त्रिया भुवनमसि साहस्रमिति ५ कृत्वा चानुमन्त्रयेत लोहितेन स्वधितिनेति ६ तन्त्रीं प्रसार्यमाणां बद्धवत्सां चानुमन्त्रयेतेयं तन्ती गवां मातेति ७ तत्रैतान्यहरहः कृत्यानि भवन्ति ८ निष्कालनप्रवेशने तन्त्रीविहरणमिति ९ गोयज्ञे पायसश्चरुः १० अग्निं यजेत पूषणमिन्द्रमीश्वरम् ११ ऋषभपूजा १२ गोयज्ञेनैवा श्वयज्ञो व्याख्यातः १३ यमवरुणौ देवतानामत्राधिकौ १४ गन्धैरभ्युक्षणं गवां गन्धैरभ्युक्षणं गवाम् १५ ६

अथातः श्रवणाकर्म १ पौर्णमास्यां कृत्यम् २ पुरस्ताच्छालाया उपलिप्य शालाग्नेरग्निं प्रणयन्ति ३ अभितश्चत्वार्युपलिम्पन्ति ४ प्रतिदिशम् ५ साधिके प्रक्रमे ६ अग्नौ कपालमाधाय सकृत्संगृहीतं यवमुष्टिं भृज्ञत्यनुपदहन् ७ पश्चादग्नेरुलूखलं दृँहयित्वावहन्त्युद्वेचम् ८ सुकृतान्सक्तून्कृत्वा चमस ओप्य शूर्पेणापिधाय निदधाति ९ दक्षिणपश्चिमे अन्तरेण संचरः १० अस्तमिते चमसदर्व्यावादाय शूर्पं चातिप्रणीतस्यार्धं व्रजति ११ शूर्पे सक्तूनावपति चमसे चोदकमादत्ते १२ सकृत्संगृहीतान्दर्व्या सक्तून्कृत्वा पूर्व उपलिप्त उदकं निनीय बलिं निवपति यः प्राच्यां दिशि सर्पराज एष ते बलिरिति १३ उपनिनयत्यपां शेषं यथा बलिं न प्रवक्ष्यतीति १४ सव्यं बाहुमन्वावृत्य चमसदर्व्यावभ्युक्ष्य प्रताप्यैवं दक्षिणैवं प्रतीच्येवमुदीची यथालिङ्गमव्या-वर्तमानः १५ शूर्पेण शेषमग्नावोप्यानतिप्रणीतस्यार्धं व्रजति १६ पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्य नमः पृथिव्या इत्येतं मन्त्रं जपति १७ प्रदोषे पायसश्चरुः १८ तस्य जुहुयाच्छ्रवणाय विष्णवेऽग्नये प्रजापतये विश्वेभ्यो देवेभ्यः स्वाहेति १९ स्थालीपाकावृतान्यत् २० उत्तरतोऽग्नेर्दर्भस्तम्बं समूलं प्रतिष्ठाप्य सोमो राजेत्येतं मन्त्रं जपति यां सन्धां समधत्तेति च २१ श्वस्ततोऽक्षतसक्तून्कार-यित्वा नवे पात्रेऽपिधाय निदधाति २२ अहरहस्तूष्णीं बलीन्हरेत्सायं प्राग्घो-मादाग्रहायण्याः २३ ७

आश्वयुज्यां पौर्णमास्यां पृषातके पायसश्चरू रौद्रः १ तस्य जुहुयादा नो मित्रावरुणेति प्रथमां मा नस्तोक इति द्वितीयाम् २ गोनामभिश्च पृथक् काम्यासीत्येतत्प्रभृतिभिः ३ स्थालीपाकावृतान्यत् ४ पृषातकं प्रदक्षिणमग्निं

पर्याणीय ब्राह्मणानवेक्षयित्वा स्वयमवेक्षेत तच्चक्षुर्देवहितं पुरस्ताच्छुक्र-मुच्चरत्पश्येम शरदः शतं जीवेम शरदः शतमिति ५ ब्राह्मणान्भोजयित्वा स्वयं भुक्त्वा जातुषान्मणीन्सर्वौषधिमिश्रानाबध्नीरन्स्वस्त्ययनार्थम् ६ सायं गाः पृषातकं प्राशयित्वा सहवत्सा वासयेत ७ स्वस्ति हासां भवति ८ नवयज्ञे पायसश्चरुरैन्द्राग्नः ९ तस्य मुख्यां हविराहुतिं हुत्वा चतसृभिराज्या-हुतिभिरभिजुहोति शतायुधायेत्येतत्प्रभृतिभिः १० स्थालीपाकावृतान्यत् ११ हविरुच्छिष्टशेषं प्राशयेद्यावन्त उपेताः स्युः १२ सकृदपामुपस्तीर्य द्विश्चरोर-वद्यति १३ त्रिर्भृगूणाम् १४ अपां चैवोपरिष्टात् १५ असंस्वादं निगिरेद्भद्रान्नः श्रेय इति १६ एवं त्रिः १७ तूष्णीं चतुर्थम् १८ भूय एवावदाय १९ कामं तत्र संस्वादयेरन् २० आचान्तोदकाः प्रत्यभिमृशेरन्मुखं शिरोऽङ्गानीत्य-नुलोममम्मोऽसीति २१ एतयैवावृता श्यामाकयवानाम् २२ अग्निः प्राश्नातु प्रथम इति श्यामाकानाम् २३ एतमु त्यं मधुना संयुतं यवमिति यवानाम् २४ ८

आग्रहायण्यां बलिहरणम् १ तच्छ्रावणेनैव व्याख्यातम् २ नमः पृथिव्या इत्येतं मन्त्रं न जपति ३ अथ पूर्वाह्ण एव प्रातराहुतिं हुत्वा दर्भाञ्शमीं वीरणां फलवतीमपामार्गं शिरीषमित्येतान्याहारयित्वा तूष्णीमक्षतसक्तूनामग्नौ कृत्वा ब्राह्मणान्स्वस्तिवाच्यैस्तैः सम्भारैः प्रदक्षिणमग्न्यागारात्प्रभृति धूमं शात-यन्गृहाननुपरीयात् ४ उत्सृजेत्कृतार्थान्सम्भारान् ५ जातशिलासु मणिकं प्रतिष्ठापयति वास्तोष्पत इत्येतेन द्विकेन पर्केण ६ द्वावुदकुम्भौ मणिक आसिञ्चेत्समन्या यन्तीत्येतयर्चा ७ प्रदोषे पायसश्चरुः ८ तस्य जुहुया-त्प्रथमा हव्युवाससेति ९ स्थालीपाकावृतान्यत् १० पश्चादग्नेर्बर्हिषि न्यञ्चौ पाणी प्रतिष्ठाप्य प्रति क्षत्र इत्येता व्याहृतीर्जपति ११ पश्चादग्नेः स्वस्तर-मास्तारयेत् १२ उदगग्रैस्तृणैः १३ उदक्प्रवणम् १४ तस्मिन्नहतान्या-स्तरणान्यास्तीर्य दक्षिणतो गृहपतिरुपविशति १५ अनन्तरा अवरे यथाज्येष्ठम् १६ अनन्तराश्च भार्याः सजाताः १७ समुपविष्टेषु गृहपतिः स्वस्तयेन्नयञ्चौ पाणी प्रतिष्ठाप्य स्योना पृथिवि नो भवेत्येतामृचं जपति १८ समाप्तायां संविशन्ति दक्षिणैः पार्श्वैः १९ एवं त्रिरभ्यात्ममावृत्य २० स्वस्त्ययनानि प्रयुज्य यथाज्ञानम् २१ अरिष्टं सामसंयोगमेके २२ अप उपस्पृश्य यथार्थम् २३ ९

अष्टका रात्रिदेवता १ पुष्टिकर्म २ आग्नेयी पित्र्या वा प्राजापत्यर्तुदेवता वैश्वदेवीति देवताविचाराः ३ चतुरष्टको हेमन्तः ४ ताः सर्वाः समाँसा-श्चिकीर्षेत् ५ इति कौत्सः ६ त्र्यष्टक इत्यौद्गाहमानिः ७ तथा गौतमवा-र्कखराडी ८ योर्ध्वमाग्रहायरायास्तामिस्राष्टमी तामपूपाष्टकेत्याचक्षते ९ स्थालीपाकावृता तराडुलानुपस्कृत्य चरुं श्रपयति १० अष्टौ चापूपान्कपा-लेऽपरिवर्तयन् ११ एककपालान् १२ अमन्त्रानित्यौद्गाहमानिः १३ त्रैयम्ब-कप्रमाणान् १४ शृतानभिघार्योदगुद्वास्य प्रत्यभिघारयेत् १५ स्थाली-पाकावृतावदाय चरोश्चापूपानां चाष्टकायै स्वाहेति जुहोति १६ स्थाली-पाकावृतान्यत् १७ तैष्या ऊर्ध्वमष्टम्यां गौः १८ तां सन्धिवेलासमीपं पुरस्ता-दग्नेरवस्थाप्योपस्थितायां जुहुयाद्यत्पशवः प्र ध्यायतेति १९ हुत्वा चानुम-न्त्रयेतानु त्वा माता मन्यतामिति २० यवमतीभिरद्भिः प्रोक्षेदष्टकायै त्वा जुष्टां प्रोक्षामीति २१ उल्मुकेन परिहरेत्परि वाजपतिः कविरिति २२ अपः पानाय दद्यात् २३ पीतशेषमधस्तात्पशोरवसिञ्चेदात्तं देवेभ्यो हविरिति २४ अथैना-मुदगुत्सृप्य संज्ञपयन्ति २५ प्राक्शिरसमुदक्पदीं देवदेवत्ये २६ दक्षिणाशिरसं प्रत्यक्पदीं पितृदेवत्ये २७ संज्ञप्तायां जुहुयाद्यत्पशुर्मायुमकृतेति २८ पत्नी चोदकमादाय पशोः सर्वाणि स्रोताँसि प्रक्षालयेत् २९ अग्रेण नाभिं पवित्रे अन्तर्धायानुलोममाकृत्य वपामुद्धरन्ति ३० तां शाखाविशाखयोः काष्ठयोर-वसज्याभ्युक्ष्य श्रपयेत् ३१ प्रश्च्युतितायां विशसतेति ब्रूयात् ३२ यथा न प्रागग्नेर्भूमिं शोणितं गच्छेत् ३३ शृतामभिघार्योदगुद्वास्य प्रत्यभिघारयेत् ३४ स्थालीपाकावृता वपामवदाय स्विष्टकृदावृता वाष्टकायै स्वाहेति जुहोति ३५ स्थालीपाकावृतान्यत्स्थालीपाकावृतान्यत् ३६ १०

इति तृतीयः प्रपाठकः

अनुप्रहरति वपाश्रपरायौ १ प्राचीमेकशूलां प्रतीचीमितराम् २ अवद्य-न्त्यवदानानि सर्वाङ्गेभ्यः ३ अन्यत्र वामाच्च सक्थ्नः क्लोम्नश्च ४ वामं सक्थ्यन्वष्टक्याय निदध्यात् ५ तस्मिन्नेवाग्नौ श्रपयत्योदनचरुं च माँसचरुं च पृथङ्मेक्षणाभ्यां प्रदक्षिणमुदायुवन् ६ शृतावभिघार्योदगुद्वास्य प्रत्यभिघारयेत् ७ कँसे रसमवासिच्य ८ प्लक्षशाखावति प्रस्तरेऽवदानानि कृत्वा ९ स्थालीपाकावृतावदानानां कँसेऽवद्यति १० स्विष्टकृतश्च पृथक् ११ चरो-रुद्धृत्य बिल्वमात्रमवदानैः सह यूषेण सन्नयेत् १२ चतुर्गृहीतमाज्यं गृहीत्वा-

ष्टर्चप्रथमया जुहुयादग्नावग्निरिति १३ सन्नीतात्तृतीयमात्रमवदाय द्वितीया-तृतीयाभ्यां जुहोति १४ उत्तरस्यां स्वाहाकारं दधाति १५ एवमेवावरे चतुर्थीपञ्चमीभ्यां षष्ठीसप्तमीभ्यां च १६ शेषमवदाय सौविष्टकृतमष्टम्यां जुहुयात् १७ यद्यु वा अल्पसम्भारतमः स्यादपि पशुनैव कुर्वीत १८ अपि वा स्थालीपाकं कुर्वीत १९ अपि वा गोग्रासमाहरेत् २० अपि वारण्ये कक्ष-मुपधाय ब्रूयादेषा मेऽष्टकेति २१ न त्वेव न कुर्वीत न त्वेव न कुर्वीत २२ १

श्वस्ततोन्वष्टक्यम् १ अपरश्वो वा २ दक्षिणपूर्वेऽष्टमदेशे परिवारयन्ति ३ तथायतम् ४ तथामुखैः कृत्यम् ५ चतुरवरार्ध्यान्प्रक्रमान् ६ पश्चादुप-संचारः ७ उत्तरार्धे परिवृतस्य लक्षणं कृत्वाग्निं प्रणयन्ति ८ पश्चादग्नेरुलूखलं दृँहयित्वा सकृत्संगृहीतं व्रीहिमुष्टिमवहन्ति सव्योत्तराभ्यां पाणिभ्याम् ९ यदा वितुषाः स्युः १० सकृदेव सुफलीकृतान्कुर्वीत ११ अथामुष्माच्च सक्थ्नो माँसपेशीमवकृत्य नवायां सूनायामणुशश्छेदयेत् १२ यथा माँसाभिघाराः पिण्डा भविष्यन्तीति १३ तस्मिन्नेवाग्नौ श्रपयत्योदनचरुं च माँसचरुं च पृथङ्मेक्षणाभ्यां प्रसव्यमुदायुवन् १४ शृतावभिघार्य दक्षिणोद्वास्य न प्रत्यभि-घारयेत् १५ दक्षिणार्धे परिवृतस्य तिस्रः कर्षूः खानयेत्पूर्वोपक्रमाः १६ प्रादेशायामाश्चतुरङ्गुलपृथिवीस्तथावखाताः १७ पूर्वस्याः कर्ष्वाः पुरस्ता-ल्लक्षणं कृत्वाग्निं प्रणयन्ति १८ अपरेण कर्षूः पर्याहृत्य लक्षणे निदध्यात् १९ सकृदाच्छिन्नं दर्भमुष्टिं स्तृणोति २० कर्षूश्च २१ पूर्वोपक्रमाः २२ पश्चात्कर्षूणां स्वस्तरमास्तारयेत् २३ दक्षिणाग्रैः कुशैः २४ दक्षिणाप्रवणम् २५ वृषीं चोपदध्यात् २६ तत्रास्मा आहरन्त्येकैकशः सव्यं बाहुमनु २७ चरुस्थाल्यौ मेक्षणे कँसं दर्वीमुदकमिति २८ पत्नी बर्हिषि शिलां निधाय स्थगरं पिनष्टि २९ तस्यां चैवाञ्जनं निघृष्य तिस्रो दर्भपिञ्जूलीरञ्जति सव्यन्तराः ३० तैलं चोपकल्पयेत् ३१ क्षौमदशां च ३२ शुचौ देशे ब्राह्मणाननिन्द्यानयुग्मा-नुदङ्मुखानुपवेश्य ३३ दर्भान्प्रदाय ३४ उदकपूर्वं तिलोदकं ददाति पितुर्नाम गृहीत्वासावेतत्ते तिलोदकं ये चात्र त्वानु याँश्च त्वमनु तस्मै ते स्वधेति ३५ अप उपस्पृश्यैवमेवेतरयोः ३६ तथा गन्धान् ३७ अग्नौ करिष्यामीत्यामन्त्रणं होष्यतः ३८ कुर्वित्युक्ते कँसे चरू समवदाय मेक्षणेनोपघातं जुहुयात्स्वाहा सोमाय पितृमत इति पूर्वां स्वाहाग्नये कव्यवाहनाय इत्युत्तराम् ३९ २

अत ऊर्ध्वं प्राचीनावीतिना वाग्यतेन कृत्यम् १ सव्येन पाणिना दर्भपिञ्जूलीं गृहीत्वा दक्षिणाग्रां लेखामुल्लिखेदपहता असुरा इति २ सव्येनैव पाणिनोल्मुकं गृहीत्वा दक्षिणार्धे कर्षूणां निदध्याद्ये रूपाणि प्रतिमुञ्चमाना इति ३ अथ पितॄनावाहयत्येत पितरः सोम्यास इति ४ अथोदपात्रान्कर्षूषु निदध्यात् ५ सव्येनैव पाणिनोदपात्रं गृहीत्वावसलवि पूर्वस्यां कर्ष्वां दर्भेषु निनयेत्पितुर्नाम गृहीत्वासाववनेनिक्ष्व ये चात्र त्वानु याँश्च त्वमनु तस्मै ते स्वधेति ६ अप उपस्पृश्यैवमेवेतरयोः ७ सव्येनैव पाणिना दर्वीं गृहीत्वा सन्नीतात्तृतीयमात्रमवदायावसलवि पूर्वस्यां कर्ष्वां दर्भेषु निदध्यात्पितुर्नाम गृहीत्वासावेष ते पिण्डो ये चात्र त्वानु याँश्च त्वमनु तस्मै ते स्वधेति ८ अप उपस्पृश्यैवमेवेतरयोः ९ यदि नामानि न विद्यात्स्वधा पितृभ्यः पृथिवीषद्भ्य इति प्रथमं पिण्डं निदध्यात्स्वधा पितृभ्योऽन्तरीक्षसद्भ्य इति द्वितीयं स्वधा पितृभ्यो दिविषद्भ्य इति तृतीयम् १० निधाय जपत्यत्र पितरो मादयध्वं यथाभागमावृषायध्वमिति ११ अपर्यावृत्य पुरोच्छ्वासादभिपर्यावर्तमानो जपेदमी मदन्त पितरो यथाभागमावृषायिषतेति १२ सव्येनैव पाणिना दर्भपिञ्जूलीं गृहीत्वावसलवि पूर्वस्यां कर्ष्वां पिण्डे निदध्यात्पितुर्नाम गृहीत्वासावेतत्त आञ्जनं ये चात्र त्वानु याँश्च त्वमनु तस्मै ते स्वधेति १३ अप उपस्पृश्यैवमेवेतरयोः १४ तथा तैलम् १५ तथा सुरभि १६ अथ निह्नुते १७ पूर्वस्यां कर्ष्वां दक्षिणोत्तानौ पाणी कृत्वा नमो वः पितरो जीवाय नमो वः पितरः शूषायेति १८ मध्यमायां सव्योत्तानौ नमो वः पितरो घोराय नमो वः पितरो रसायेति १९ उत्तमायां दक्षिणोत्तानौ नमो वः पितरः स्वधायै नमो वः पितरो मन्यव इति २० अथाञ्जलिकृतो जपति नमो वः पितरः पितरो नमो व इति २१ गृहानवेक्षते गृहान्नः पितरो दत्तेति २२ पिण्डानवेक्षते सदो वः पितरो देष्मेति २३ सव्येनैव पाणिना सूत्रतन्तुं गृहीत्वावसलवि पूर्वस्यां कर्ष्वां पिण्डे निदध्यात्पितुर्नाम गृहीत्वासावेतत्ते वासो ये चात्र त्वानु याँश्च त्वमनु तस्मै ते स्वधेति २४ अप उपस्पृश्यैवमेवेतरयोः २५ सव्येनैव पाणिनोदपात्रं गृहीत्वावसलवि पिण्डान्परिषिञ्चेदूर्जं वहन्तीरिति २६ मध्यमं पिण्डं पत्नी पुत्रकामा प्राश्नीयादाधत्त पितरो गर्भमिति २७ यो वा तेषां ब्राह्मणानामुच्छिष्टभाक् स्यात् २८ अभून्नो दूतो हविषो जातवेदा इत्युल्मुकमद्भिरभ्युक्ष्य २९ द्वन्द्वं पात्राणि प्रक्षाल्य प्रत्यतिहारयेत् ३० अप्सु पिण्डान्सादयेत् ३१ प्रणीते वाग्नौ ३२ ब्राह्मणं वा भोजयेत् ३३ गवे वा दद्यात् ३४

वृद्धिपूर्तेषु युग्मानाशयेत् ३५ प्रदक्षिणमुपचारः ३६ यवैस्तिलार्थः ३७ ३

अन्वष्टक्यस्थालीपाकेन पिण्डपितृयज्ञो व्याख्यातः १ अमावास्यायां तच्छ्रा-द्धम् २ इतरदन्वाहार्यम् ३ मासीनम् ४ दक्षिणाग्नौ हविषः संस्करणम् ५ ततश्चैवातिप्रणयः ६ शालाग्नावनाहिताग्नेः ७ एका कर्षूः ८ तस्या दक्षिण-तोऽग्नेः स्थानम् ९ नात्रोल्मुकनिधानम् १० न स्वस्तरः ११ नाञ्जनाभ्यञ्जने १२ न सुरभि १३ न निह्नवनम् १४ उदपात्रान्तः १५ वासस्तु निदध्यात् १६ माघ्या ऊर्ध्वमष्टम्यां स्थालीपाकः १७ तस्य जुहुयात् १८ अष्टकायै स्वाहेति जुहोति १९ स्थालीपाकावृतान्यत् २० शाकं व्यञ्जनमन्वाहार्ये २१ अथ पितृदैवत्येषु पशुषु वह वपां जातवेदः पितृभ्य इति वपां जुहुयात् २२ देवदेवत्येषु जातवेदो वपया गच्छ देवानिति २३ अनाज्ञातेषु तथादेशं यथाष्टकायै स्वाहेति जुहोति २४ स्थालीपाकावृतान्यत् २५ ऋणे प्रज्ञायमाने गोलकानां मध्यमपर्णेन जुहुयाद्यत्कुसीदमिति २६ अथातो हलाभियोगः २७ पुण्ये नक्षत्रे स्थालीपाकं श्रपयित्वैताभ्यो देवताभ्यो जुहुयादिन्द्राय मरुद्भ्यः पर्जन्यायाशन्यै भगाय २८ सीतामाशामरडामनघां च यजेत २९ एता एव देवताः सीतायज्ञखलयज्ञप्रवपणप्रलवनपर्ययणेषु ३० आखुराजं चोत्करेषु यजेत ३१ इन्द्राण्याः स्थालीपाकः ३२ तस्य जुहुयादेकाष्टका तपसा तप्य-मानेति ३३ स्थालीपाकावृतान्यत्स्थालीपाकावृतान्यत् ३४ ४

काम्येष्वत ऊर्ध्वम् १ पूर्वेषु चैके २ पश्चादग्नेर्भूमौ न्यञ्चौ पाणी प्रतिष्ठाप्येदं भूमेर्भजामह इति ३ वस्वन्तं रात्रौ धनमिति दिवा ४ इमं स्तोममिति तृचेन परिसमूहेत् ५ वैरूपाक्षः पुरस्ताद्धोमानाम् ६ काम्येषु च प्रपदः ७ तपश्च तेजश्चेति जपित्वा प्राणायाममायम्यार्थमना वैरूपाक्षमारभ्योच्छ्वसेत् ८ काम्येषु त्रिरात्राभोजनम् ९ त्रीणि वा भक्तानि १० नित्यप्रयुक्तानां तु प्रथम-प्रयोगेषु ११ उपोष्य तु यजनीयप्रयोगेषु १२ उपरिष्टाद्दैक्षं सान्निपातिकम् १३ अरण्ये प्रपदं प्रयुञ्जीत दर्भेष्वासीनः १४ प्राक्तूलेषु ब्रह्मवर्चसकामः १५ उद-क्तूलेषु पुत्रपशुकामः १६ उभयेषूभयकामः १७ पशुस्वस्त्ययनकामो व्रीहि-यवहोमं प्रयुञ्जीत सहस्रबाहुर्गौपत्य इति १८ कौतोमतेन महावृक्षफलानि परिजप्य प्रयच्छेत् १९ यस्यात्मनि प्रसादमिच्छेत्तस्मै २० एकभूयाँस्यात्मनो युग्मानि कुर्यात् २१ वृक्ष इवेति पञ्चर्चः २२ तस्मिन्प्रथमं पार्थिवं कर्म २३

अर्धमासमभुक्त्वा २४ अशक्तौ वा पेयामन्यतरं कालम् २५ यत्रात्मानं परिपश्येत् २६ एतद्व्रतमर्धमासव्रतेषु २७ पौर्णमास्यां रात्राववविदासिनि ह्रदे नाभिमात्रमवगाह्याक्षततण्डुलानृगन्तेष्वास्येन जुहुयात्स्वाहेत्युदके २८ अथापरम् २९ प्रथमयादित्यमुपतिष्ठेत भोगकामोऽर्थपतिचक्षुर्विषये सिध्यत्यर्थः ३० द्वितीययादित्ये परिविष्यमाणेऽक्षततण्डुलाञ्जुहुयाद्बृहत्पत्त्रस्वस्त्ययनकामः ३१ तृतीयया चन्द्रमसि तिलतण्डुलान्क्षुद्रपशुस्वस्त्ययनकामः ३२ चतुर्थ्यादित्यमुपस्थायार्थान्प्रतिपद्येत स्वस्त्यर्थवानागच्छति ३३ पञ्चम्यादित्यमुपस्थाय गृहान्प्रपद्येत स्वस्ति गृहानागच्छति स्वस्ति गृहानागच्छति ३४ ५

भूरित्यनकाममारं नित्यं प्रयुञ्जीत १ न पापरोगान्नाभिचरणाद्भयम् २ अलक्ष्मीनिर्णोदः ३ यजनीयप्रयोगः ४ मूर्ध्नोऽधि म इत्येकैकया ५ या तिरश्चीति सप्तमी ६ वामदेव्यर्चः ७ महाव्याहृतयः ८ प्रजापत इत्युत्तमा ९ यशोऽहं भवामीति यशस्काम आदित्यमुपतिष्ठेत पूर्वाह्णमध्यन्दिनापराह्णेषु १० प्रातरह्नस्येति सन्नामयन् ११ सन्धिवेलयोरुपस्थानं स्वस्त्ययनमादित्य नावमित्युद्यन्तं त्वादित्यानूदियासमिति पूर्वाह्णे प्रतितिष्ठन्तं त्वादित्यानुप्रतितिष्ठासमित्यपराह्णे १२ आचितशतकामोऽर्धमासव्रतस्तामिस्रादौ व्रीहिकाँसौदनं ब्राह्मणान्भोजयित्वा १३ तस्य कणानपरासु सन्धिवेलासु प्रत्यङ्ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधायादित्यमभिमुखो जुहुयाद्भलाय स्वाहा भल्लाय स्वाहेति १४ एतयैवावृतापरौ तामिस्रौ १५ तामिस्रान्तरेषु ब्रह्मचारी स्यादा समापनादा समापनात् १६ ६

अवसानं जोषयेत १ समं लोमशमविभ्रंशि २ प्राच्य उदीच्यो वा यत्रापः प्रवर्तेरन् ३ अक्षीरिण्योऽकण्टका अकटुका यत्रौषधयः स्युः ४ गौरपाँसु ब्राह्मणस्य ५ लोहितपाँसु क्षत्रियस्य ६ कृष्णपाँसु वैश्यस्य ७ स्थिराघातमेकवर्णमशुष्कमनूषरममरुपरिहितमकिलिनम् ८ दर्भसम्मितं ब्रह्मवर्चसकामस्य ९ बृहत्तृणैर्बलकामस्य १० मृदुतृणैः पशुकामस्य ११ शादासम्मितम् १२ मण्डलद्वीपसम्मितं वा १३ यत्र वा श्वभ्राः स्वयंखाताः सर्वतोऽभिमुखाः स्युः १४ तत्रावसानं प्राग्द्वारं यशस्कामो बलकामः कुर्वीत १५ उदग्द्वारं पुत्रपशुकामः १६ दक्षिणाद्वारं सर्वकामः १७ न प्रत्यग्द्वारं कुर्वीत १८

अनुद्वारं च १९ गृहद्वारम् २० यथा न संलोकी स्यात् २१ वर्जयेत्पूर्वतोऽश्वत्थं प्लक्षं दक्षिणतस्तथा न्यग्रोधमपराद्देशादुत्तराच्चाप्युदुम्बरम् २२ अश्वत्थादग्नि-भयं च प्लक्षाद्ब्रूयात्प्रमायुकान्नयग्रोधाच्छस्त्रसंपीडामक्ष्यामयमुदुम्बरात् २३ आदित्यदेवतोऽश्वत्थः प्लक्षो च यमदेवतः न्यग्रोधो वारुणो वृक्षः प्राजापत्य उदुम्बरः २४ तानस्वस्थानस्थान्कुर्वीत २५ एताश्चैव देवता अभियजेत् २६ मध्येऽग्निमुपसमाधाय कृष्णया गवा यजेत २७ अजेन वा श्वेतेन २८ सपायसाभ्याम् २९ पायसेन वा ३० वसामाज्यं माँसं पायसमिति संयूय ३१ अष्टगृहीतं गृहीत्वा जुहुयात् ३२ वास्तोष्पत इति प्रथमा ३३ वामदेव्यर्चः ३४ महाव्याहृतयः ३५ प्रजापतय इत्युत्तमा ३६ हुत्वा दश बलीन्हरेत् ३७ प्रदक्षिणं प्रतिदिशम् ३८ अवान्तरदेशेषु ३९ आनुपूर्व्येणाव्य-तिहरन् ४० इन्द्रायेति पुरस्ताद्वायव इत्यवान्तरदेशे यमायेति दक्षिणतः पितृभ्य इत्य-वान्तरदेशे वरुणायेति पश्चान्महाराजायेत्यवान्तरदेशे सोमायेत्युत्तरतो महेन्द्रा-येत्यवान्तरदेशे वासुकय इत्यधस्तादूर्ध्वं नमो ब्रह्मण इति दिवि ४१ प्राच्यू-र्ध्वावाचीभ्योऽहरहर्नित्यप्रयोगः ४२ संवत्सरेसंवत्सरे नवयज्ञयोर्वा ४३ ७

श्रवणाग्रहायणीकर्मणोरक्षताञ् छिष्ट्वा १ प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य चतुष्प-थेऽग्निमुपसमाधाय हये राक इत्येकैकयाञ्जलिना जुहुयात् २ प्राङुत्क्रम्य व-सुवन एधीत्यूर्ध्वमुदीक्षमाणो देवजनेभ्यः ३ तिर्यङ्ङितरजनेभ्योऽर्वाङवे-क्षमाणः ४ अनपेक्षमाणः प्रत्येत्याक्षतान्प्राश्नीयादुपेतैरमात्यैः सह ५ स्व-स्त्ययनम् ६ वशंगमौ शङ्खश्चेति पृथगाहुती व्रीहियवहोमौ प्रयुञ्जीत ७ यस्यात्मनि प्रसादमिच्छेत्तस्मै ८ नित्यप्रयोगः ९ एकाक्षर्यायामर्धमासव्रते द्वे कर्मणी १० पौर्णमास्यां रात्रौ खदिरशङ्कुशतं जुहुयादायुष्कामः ११ आय-सान्वधकामः १२ अथापरम् १३ प्राङ् वोदङ्वा ग्रामान्निष्क्रम्य चतुष्पथे पर्वते वारण्यैर्गोमयैः स्थण्डिलं प्रताप्यापोह्याङ्गारान्मन्त्रं मनसानुद्रुत्य सर्पिरास्येन जुहुयात् १४ ज्वलन्त्यां द्वादश ग्रामाः १५ धूमे त्र्यवराध्र्याः १६ अमोघं कर्मेत्याचक्षते १७ वृत्त्यविच्छित्तिकामो हरितगोमयान्सा-यंप्रातर्जुहुयात् १८ त्रिरात्रोपोषितः पण्यहोमं जुहुयादिदमहमिमं विश्वकर्माण-मिति १९ वाससस्तन्तून् २० गोर्वालान् २१ एवमितरेभ्यः पण्येभ्यः २२ पूर्णहोमो यजनीयप्रयोगः २३ इन्द्रामवदादिति च २४ यशस्कामः पूर्वा सहायकाम उत्तराम् २५ ८

पुरुषाधिपत्यकामोऽष्टरात्रमभुक्त्वा १ औदुम्बरान्स्रुचमसेध्मानुपकल्पयित्वा २ प्राङ्वोदङ्वा ग्रामान्निष्क्रम्य चतुष्पथेऽग्निमुपसमाधाय ३ आज्यमादित्य-मभिमुखो जुहुयादन्नं वा एकच्छन्दस्यं श्रीर्वा एषेति च ४ अन्नस्य घृतमेवेति ग्रामे तृतीयाम् ५ गोष्ठे पशुकामः ६ विदूयमाने चीवरम् ७ प्रतिभयेऽध्वनि वस्त्रदशानां ग्रन्थीन्बध्नीत ८ उपेत्य वसनवतः ९ स्वाहाकारान्ताभिः १० सहायानां च स्वस्त्ययनम् ११ आचितसहस्रकामोऽक्षतसक्त्वाहुतिसहस्रं जुहुयात् १२ पशुकामो वत्समिथुनयोः पुरीषाहुतिसहस्रं जुहुयात् १३ अवि-मिथुनयोः क्षुद्रपशुकामः १४ वृत्त्यविच्छित्तिकामः कम्बू-कान्सायंप्रात-र्जुहुयात्क्षुधे स्वाहा क्षुत्पिपासाभ्यां स्वाहेति १५ मा भैषीर्न मरिष्यसीति विषवता दष्टमद्भिरभ्युक्षञ्जपेत् १६ तुर गोपायेति स्नातकः संवे-शनवेलायां वैणवं दण्डमुपनिदधीत १७ स्वस्त्ययनार्थम् १८ हतस्ते अत्रिणा कृमिरिति कृमिमन्तं देशमद्भिरभ्युक्षञ्जपेत् १९ पशूनां चेच्चिकीर्षेदपराह्णे सी-तालोष्ट-माहृत्य वैहायसं निदध्यात् २० तस्य पूर्वाह्णे पाँसुभिः परिकिरञ्जपेत् २१ ९

उत्तरतो गां बद्ध्वोपतिष्ठेरन्नर्हणा पुत्र उवास सेति १ इदमहमिमां पद्यां विराजमन्नाद्यायाधितिष्ठामीति प्रतितिष्ठमानो जपेत् २ यत्रैनमर्हयिष्यन्तः स्युः ३ यदा वार्हयेयुः ४ विष्टरपाद्यार्घ्याचमनीयमधुपर्कानेकैकशस्त्रिस्त्रिर्वेदयेरन् ५ या ओषधीरित्युदञ्चं विष्टरमास्तीर्याध्युपविशेत् ६ द्वौ चेत्पृथगृग्भ्याम् ७ पादयोरन्यम् ८ यतो देवीरित्यपः प्रेक्षेत ९ सव्यं पादमवनेनिज इति सव्यं पादं प्रक्षालयेद्दक्षिणं पादमवनेनिज इति दक्षिणं पादं प्रक्षालयेत् १० पूर्वमन्यमपरमन्यमित्युभौ शेषेण ११ अन्नस्य राष्ट्रिरसीत्यर्घ्यं प्रतिगृह्णीयात् १२ यशोऽसीत्याचमनीयमाचामेत् १३ यशसो यशोऽसीति मधुपर्कं प्रतिगृह्णीयात् १४ यशसो भक्षोऽसि महसो भक्षोऽसि श्रीर्भक्षोऽसि श्रियं मयि धेहीति त्रिः पिबेत् १५ तूष्णीं चतुर्थम् १६ भूय एवाभिपाय शेषं ब्राह्मणाय दद्यात् १७ आचान्तोदकाय गौरिति नापितस्त्रिर्ब्रूयात् १८ मुञ्च गां वरुणपाशाद्द्विषन्तं मेऽभिधेहीति तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पिबतूदकमिति ब्रूयात् १९ माता रुद्राणामित्यनुमन्त्रयेत २० अन्यत्र यज्ञात् २१ कुरुतेत्यधियज्ञम् २२ षड् अर्घ्यार्हा भवन्ति २३ आचार्य ऋत्विक् स्नातको राजा विवाह्यः प्रियोऽतिथिरिति २४ परिसंवत्सरानर्हयेयुः २५ पुनर्यज्ञविवाहयोश्च पुनर्यज्ञ-विवाहयोश्च २६ १०

इति चतुर्थः प्रपाठकः

इति सामवेदस्य गोभिलीयगृह्यसूत्रं समाप्तम्

Credits
Source: *Gobhila-GṛhyaSūtra*, F. Knauer, Dorpat 1884.
Typescript: Entered and corrected by Carlos Jordan Colera
Conversion to Devanagari using Vedapad Software by Ralph Bunker

Formatted for Maharishi University of Management Vedic Literature Collection